M-2735

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
श्रीकाळिकाकुळ	ब्रह्मानंद सरस्वती	स्तोत्र	अपूर्ण		3/9	17	संस्कृत	कागद	12	33		

॥श्रीगणेशाय नमः॥ श्रीदक्षिणकालिकायै नमः॥ अथानंदमयी साक्षी त्रिगुणा निर्गुणात्मिका॥
वंदेहं नीलकुंतलस्थिताशिवतिनाशिनीं॥१॥ संचिंत्य परमात्मानं ध्रुव सेतोरूहामलं संगृहे वै दागम
व्यासवाक्यं॥ हितायतन्मंत्रजं पार्थिनां मुमुक्षु वै सुदानंद कैलासस्वरूपं॥२॥ आनंदो ह्यपि
नीरीका ब्रह्मानंदेन तायते॥ प्रकृतिर्ब्रह्ममयी प्रधाना। अथैनां ब्रह्मनिरूपिणी माश्रि
त्रिगुणा त्रिगुणात्मिति॥ श्रुतिस्मृत्योस्तत्वात् आद्या प्रकृतिर्महाकालिका ब्रह्ममयी
प्रधाना॥ ब्रह्मस्वरूपिणी त्रिगुणामिति दर्शिता। अतस्तदुपासकाः ब्रह्मविष्णुशि
वादयः सूर्यवरः॥ प्रधाना ब्रह्मरूपिणीति॥ तथा कुमारीतंत्रे॥ अतिगुह्यतरं पितत्वे श्री
नाम श्रेष्ठ सनातनं॥ अतीव च सुगोप्यं च कथितं भैरवस्य वै॥ अतीव मे प्रिया सीतिकथा
पमितचप्रिये॥ रूपाणि बहु संख्यानि प्रकृते संति शांभवी॥ तेषां मध्ये प्रधानं तु काली
रूपं मनोहरं॥ विशेषतः कलियुगे नराणां भुक्तिमुक्तिदं॥ तस्यादुपासकाः श्रीव ब्रह्मवि
ष्णुशिवादयः॥ चंद्रसूर्यश्च वरुणः कुबेरोग्निस्तथापरः॥ दुर्वासाश्च वशिष्ठश्च दत्ता
त्रेयो बृहस्पतिः॥ बहुनात्किमिहोक्तेन सर्वे देवा उपासकाः॥ कालिकायाप्रसादेन भुक्ति

॥२॥

मुक्त्यादिभागिनः॥ उत्तरतंत्रे॥ प्रधाना प्रकृतिः काली त्रिगुणाद्वैतरूपिणी॥ शृंगार
लीलानिरता वीरभावसमाश्रिता॥ द्वैतरूपा कालिके न तस्याः शृंगारलीलासं
गतिर्जायते॥ कालिका सैव [illegible] स्वांगं गुरुरूपभेदेन स्वयं शृंगाररूपिणी॥ क्रीडानंदर
समग्नाद्वैतरूपा तु चिन्मयी॥ तत्रतंत्रे [illegible] सर्वमिदं विश्वं चराचरं॥ जायते न च तत्
[illegible] गतापि कदाचन॥ तद्रूपं मनुमात्रं तु ब्रह्मविष्णुशिवादयः॥ ध्यायंति ते [illegible]
[illegible]तराः सृष्टिसंहारकारकाः॥ येनात्मरूपया [illegible] कस्य मुक्तिर्न दृश्यते॥ अतः सर्व
भक्तानुग्रहाय यामतास्वात्माभिन्नवर्तिना नंदरसमग्नेन महाकालेन महामंत्रराजस्व
रूपेद्गीतेन मंत्रध्यानयंत्रसाधनभेदाः स्तुतिरारेभे॥ यथोक्तं उत्तरतंत्रवीरतंत्रतंत्रां
तरेषु॥ हृदयिस्था महाकालीस्वरूपाख्यं पठेत्तु यः॥ स्तोत्रं पापप्रणाशं च सर्वसौख्य
स्य कारणं॥ किं वा बाणार्थं च विज्ञाय स्मरगीतेन त्रैलोक्ये॥ स्तोत्रे वा किंच श्लोकं वा श्लो
कार्थं वाऽनिशं श्रावितः॥ पठेत् मोहयेत् विश्वमिदं सर्वं चराचरं॥ सर्वमाकर्षयेत् विश्वं
वशमानयति देवराट्॥ प्रकृतिर्वै महेशानी [illegible] कुर्यात् जगत्त्रयं॥ सम्भयेत् दारिद्र्यं सर्वं

॥

ज्योतिः अन्ते जलं परं ॥ गीतं मर्त्ये परं चास्य तत्त्वं ज्ञानाति के त्वावः ॥ वेत्स्यहं वेत्ति प्रमोच

किंचिज्ज्ञानाति नारद यानि दयास तदर्थं तु नान्यो वेत्ति कदाचन ॥ एतद्गीतेन श्रीकृष्णो गो

पिगणमाकर्षयति चंद्रमपि स्तंभयेत् ॥ तथा श्रीभागवते ॥ भगवानपि ता रात्रीः शरद

द्योत्फुल्लमल्लिकाः ॥ वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ कृष्णोपि रंतुं स तासां च

नेतुं मनश्चक्रे ॥ योगमायां भगवतीं महाकालीमुपाश्रितः ॥ औत्सुक्यः उपास

नं कृतवेति भावः ॥ ५ ॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमानेनाभं नवकुंकुमारुणं ॥ वनं च

तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ॥ ७ ॥ अनंगवर्धनं गोप्याकर्षकं

जगौ वामदृशां गोपीनां मनोहरं । चित्तहारकं ॥ तेन कुमुद्वता ॥ कुंकुमारुणा । कलस्त्रा(?)

सकाम मनोहराऽङ्गकृत्त्रयुतः ॥ कामदकं ईकारः ॥ अखंडमंडलं बिंदुस्तत्र युतः ॥ क्लीं इति बीजं जातं ऐतत्त्रिबीजं स्तौति प्रथमे दर्शितं ॥ कृत्य ने न सर्व गीतं सरचि

तं ॥ ८ ॥ तेसस्तं यथा ॥ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ॥

आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ॥ ९ ॥ रतहास्यसंयो

लो

भैंगया श्रीव्यासदेवेन रासपंचाध्यायेवर्णितः॥ कथा ब्रह्मवैवर्ते॥ गोलोके रासमंडले
कृष्णकृतरासयाप्रजायते॥ सरस्वतीगानानंतरे कृष्णप्रेरितः॥ शंभुरेतस्तोत्रं ज
॥१॥ गौ देवे तस्मिन्नंतरे॥ शंभुः प्रसन्नकंप्रारितो गुरुः॥ जगौ प्रवृत्तिसंगीतं रासोल्लास
समन्वितं॥ मूर्छां प्रापुः सुराः सर्वे चित्रपुत्तलिका यथा॥ ध्यानेन चेतनां प्रा
प्य ददृशू रासमंडलं॥ स्थलं सर्वं जलाकीर्णं राधाकृष्णविहीनकं॥ गोपालाश्चैव रु
रुदुः सर्वे गोपा गोप्यः सुराद्विजाः॥ ध्यानेन ब्रह्मा बुबुधे सर्वं स्वत्वं समर्पितं॥ ग
तश्च राधया सार्द्धं श्रीकृष्णो द्रवतामिति॥ ब्रह्मसामतृकाल्याः संगीतं मंत्रादिरच
चितं स्वरूपाद्यस्तोत्रं स्वरनेदंराप्ति॥ कंश्चिवदर्शो कुमारहस्य बोध्याय दीय
ते॥ पंचभिः श्लोकैर्महामंत्रराजे स्तोप्रस्तौति कर्पूरमित्यादि॥ छ॥ कर्पूरं मध्य ॥१॥
मांत्यस्वरपररहितं सेंदु वामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये
प.॥नि जपंति॥ तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः स्वच्छंदं ध्वांतधाराधररुचि
रुचिरे सर्वसिद्धिं गतानां॥१॥ हे मातः त्रिपुरहरस्य त्रिनवस्य च पुत्रे॥ तवयत

द्वंद्वयं कदाचिदेकवारं जपति स जनो वा वाचामधीशाद्बृहस्पतिं च नंदकुबेरमपि तोष्यत्यचिर
कालपर्यंतं ॥ अंबुजाक्षीपद्माक्षीनां सां वृंदं समूहं मोहयं त्र्य वशं नयति समर्थो भवतीत्य
र्थः ॥२॥ चंद्रार्द्धचंद्र अर्द्धचंद्रधारिणी ॥ अन्यद्द्वितीयमाह ॥ ईशानं हकारं ॥ नादबिंदुना
सह इकार युक्तं मतेन ह्रूं इति बीजं ॥ कूर्चाख्यमिति हृदयं ॥२॥ ईशो वैश्वानरस्थः शशि
धरविलसद्वामनेत्रेण युक्तो बीजं ते द्वंद्वमन्यद्विगलितचिकुरे कालिके ये जपंति ॥ द्वे
रं घ्नंति ते च त्रिभुवनमभितो वश्यभावं नयंति सृक्कद्वंद्वास्रधाराद्वयधरवदने दक्षि
णे कालिके ति ॥३॥ हे विगलितचिकुरे मुक्तकेशि कालिके ये जना स्तेतव अन्यद्बीजं द्व
द्व युगलं जपंति ॥ ते जना द्वेष्टारं शत्रुं घ्नंति अभितः सर्वतो भावेन त्रिभुवनं वश्यभा
वं नयंति ॥ किंभूते सृक्कद्वंद्वतस्याद् सृग्धाराद्वयधरं वदनं यस्याः सा तत्संबोधने ॥ दक्षि
णे कालिके ति संबोधिरत्र छंदसत्वात् ॥ अन्यद्बीजमाह ॥ ईशः शिवो हकारः वैश्वा
नरस्थो रं इति बीजं स्थो रेफस्थः ॥ शशिधरविलसत्ता अर्द्धचंद्रेण सह वामनेत्रपदी
र्घ ईकारेण युक्तं ॥ केवलं नादस्थो योगि तेना दत्तं बिंदुर्लक्ष्यते ॥ एतेन भुवनेश्वरी बी
जं जातं ॥४॥ ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुंडं तथाधः सव्ये भीतिं वरं

ह्रूं॥

त्रे

ह्रीं॥

श्चित्रिजगद्घहरे दक्षिणे कालिके त्ति ॥ अत्रैसौ तन्नामयेयत्तवविमलतनुंभावयेंसेवमंवतेषाम
ष्टौकरस्थाः प्रकटितवदने सिद्धयस्त्र्यंबकस्य ॥४॥ हे त्रिजगतामघपापंहरे दक्षिणे कालिके चेतन्ना
मलस्या ॥ तवविमलतनुं निस्पंदे दीप्यमानतनुं ॥ अमलस्वरूपं ये भावयंति हे अंब हे मातः ॥ प्रकटितं
विस्तारितं वदनं यस्या सा ततस्तं बोधने ॥ तेषां जनानां मे यस्त्र्यंबकस्य शिवस्य अष्टौ सिद्धयः कर
स्था भवंति ॥ स्वरूपमाह ॥ वामे वामभुजेस्य येदक्षिणभुजे च करकमलतले उर्ध्वे रूपाणां तदधः
स्थितं वमूर्ध्वेभभयं तद चौव च दधाने ॥ प्रतवतीति भावः ॥ चतुर्भुजात्मसिति तिस्फुचितं ॥४॥ व
र्गाद्यं वह्निसंयुक्तं विधुरतिवलवितं तत्त्रयं कूर्चबीजं युग्मं लज्जाद्वंद्वं लज्जासिद्धं च पश्चात्स्मितमुखित
दधः षष्ठद्वयं योजयित्वा ॥ मातर्ये ये जपंति स्मरहरमहिले भावयंतः स्वरूपं ते लक्ष्मीलास्यलीलाकम
लदलदृशः कामरूपा भवंति ॥ ५ ॥ मंत्रसंपूर्ण जपप्रकमाह ॥ वर्गाद्यमिति हे स्मितमुखि हास्यानने
मातः ॥ स्मरहरस्य त्रिवस्य महिले गौरि ॥ वर्गाद्यं ककारं वह्नियुक्तं रेफयुक्तं विधुश्रंज्ञो रति सीकारः
लाभ्यां लंछितं भूषितं एतत्त्रीजत्रयं ॥ कूर्चं युग्मं लज्जायामायायुग्मं तदधः पश्चात् दक्षिणंठद्वयं स्वाहा यो
जयित्वा ये भूतजनाः स्मरधराजपंति ॥ ते ते जनाः लक्ष्मीलास्यलीलाकमलदलदृशः लक्ष्मीवि
लासकमलदलसदृशाः कामरूपा कंदर्परूपा बहुरूपधरा वा सर्वत्र विजयिनो भवंति ॥ तेषां

॥५॥

मृतोः ते तव स्वरूपं भावयेत तच्चिंतयेत ॥ ५ ॥ प्रत्येकं वा द्वयं वा त्रयमपि च प
रं बीजमत्यंतगुह्यं त्वां मन्त्राम्नायो जपित्वा सकलमपि सदा भावयंतो जपंति ॥
तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे वाग्देवी देवि मुंडस्रगति
रायल्लसत्कंठि पीनस्तनाढ्ये ॥ ६ ॥ पुनर्मंत्रभेदेन स्तुतिमाह ॥ प्रत्येकमिति
हे देवि दीप्यमाने ये साधकाः ऐकमेकं प्रत्येकं पृथक् पृथक् बीजस्वरूपं वा द्वयं वा त्रयं वा बी
जं च कामादेतदतिरिक्तं परं प्रणव वाग्भव यदि बीजमत्यंतगुह्यं ॥ त्वां मन्त्राम्नायो जपित्वा स
दा सर्वदा मंत्र निजस्वरूपेण सकलं मंत्रमपि भावयंतः संतो जपंति ॥ तेन केपि यात तव मंत्रभेदं ज
पंतीति भावः ॥ तेषां जनानां नेत्रारविंदे चक्षुः पद्म कमला लक्ष्मीः वक्त्रशुभ्रांशुबिंबे मुखच
न्द्रबिंबे वाचां संस्कृतादीनां देवी सरस्वती विहरति क्रीडां करोति ॥ किंभूते ॥ मुंडानां स्रजा मालया अ
तिरायमसंततेन लसत् चर्चितं कंठं यस्याः सा तत्संबोधने ॥ हे पीनस्तनाढ्ये ॥ गतासूनां
बहु प्रकार कृत कांची परिलसन्नितंबां दिगंबरां त्रिभुवनविधात्रीं त्रिनयनां ॥ श्मशानस्थां ॥७॥
तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥ ७ ॥ इदानीं ध्या
नस्तवमाह ॥ गतासूनामिति हे जननि जडचेता मंदबुद्धिरपि निश्चयेन ॥ शवानां शयने श्मशाने

तत्र तिष्ठतीति ॥ तत्र यावद्वहुदितं सैव त्रायायां त्रिभुवनविधात्री त्रिभुवनजननी ॥ त्वां ध्यायन्नसन्न कविः
स्यात् ॥ किंभूतां त्रिनयनां त्रिनेत्रां ॥ दिगेव वस्त्रं यस्याः सा तां दिगंबरीं ॥ गतासूनां गतप्राणानां शवानां
बाहूनां हस्तानां प्रकरः समूहः तैः कृतकांचीकटिमेखला तया परिलसत्सारिभूषितं नितंबं
यस्याः सा तां ॥ महाकालस्य सुरतस्तेन प्रयुक्तां ॥ ७ ॥ शिवाभिर्घोराभिः शवनिवहमुंडास्थिनिक
रैः परं संकीर्णायां प्रकटितचितायां हरवधूं ॥ प्रविष्टां संतुष्टामुपरि सुरतेनातियुवतिं सदा त्वां
ध्यायंति क्वचिदपि न तेषां परिभवः ॥ ८ ॥ ये जनाः सदा त्वां हरवधूं अतियुवतीं स्थिरयौवनां
यं ध्यायंति तेषां क्वचिदपि कुत्रापि न परिभवो न पराजयो न भवति ॥ सर्वत्र जयपदृति भावः ॥ किंभूतां उप
रि सुरतेन संतुष्टां ॥ शिवाभिर्घोराभिः शवनिवहः शवसमूहः तेषां मुंडास्थिनिकरैः परमुत्कृ
ष्टसंकीर्णायां विस्तीर्णायां प्रकटितप्रकाशितचितायां प्रविष्टां संस्थितां पीठन्यासानंतरं ता
मेव ध्यायेदिति भावः ॥ ८ ॥ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धाता नापीशो हरिरपि
न ते वेत्ति परमं ॥ तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते तदेतत्क्षंतव्यं न खलु पशुरोषः
समुचितः ॥ ९ ॥ साधून तत्वं पीठतलं न को जानाति सोऽयं न स्तौति वेदान्त इति ॥ हे जननि वयं
जडधियो मंदबु[illegible] येऽहं उच्चैस्ते तव किं वदामः ॥ एवं धाता ब्रह्मा ईशः शिवः हरिः विष्णुरपि

तेन भवे एतद्रहस्यमाणां परमं। साधनं तत्वं पीठतत्वं च न वेत्ति न जानाति॥ हे असिते हे धूम्रे लद्रुतिरक्षावं
मुखस्य विचपलं करोति तिखयात ह्लं तव यं स्खलुनि श्री येपशुदोषः पशुभावदोषः न समुचितो नयोग्य

॥५॥ धूम्रवर्णः॥१८॥ समंतादापीनस्तनजघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तः तव म
नुं विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः समस्ताः सिद्धौघा भुवि चिरतरं जीवति
कविः॥१०॥ जपसाधनविधिरूपस्तवमाह॥ समंतादिति हे देवी भक्तो नक्तं रात्रौ त्वां ध्या
यन् चिंतयन् तव मनुं मंत्रं यदि जपति तदा समस्ताः सिद्धौघाः सिद्धिसमूहास्तस्य वशगाः
भवंति। भुवि पृथिव्यां चिरतरं बहुकालं जीवति कविः स्यात्॥ भक्तः कथंभूतः गलितचिकुरस्मु
क्तकेशः विवासा नग्नः समंतात् सर्वतो वेष्टितः पीनस्तनजघनेधृग्यौवनवतीति धृक् सा चासौ यौव
नवती चेति॥ तया ताभिर्वा रतासक्तः क्रीडासक्तः तेन रक्तासाधनमुक्तं॥१०॥ समाः सुस्वी
भूतां जपनिजविपरीतां यदि सदा विचिंत्य त्वां ध्यायेत् अतिशयमहाकालसुरतां॥ तदा तस्य क्षोणी
तलविहरमाणस्य विदुषः करांभोजे वश्या हरवधु महासिद्धिनिवहाः॥११॥ हे हरवधु यदि भ ॥५॥
क्तः समाः समभावेन। अक्षुब्धचित्तेन सदा तां विचिंत्य विपरीतां ध्यायंश्च तव मनुं जपति तदा
तस्य जनस्य करांभोजे हस्तपद्मे महासिद्धिनिवहाः॥ महासिद्धिसमूहा वश्या भवंति॥ किंभू

तस्य तस्य क्षोणी[illegible]ष्वीतलविहरमाणस्य विदुषः पंडितस्य ज्ञानिनो या क्षोणीतलं नगमिति भावः॥
त्वां किंभूतां अतिशयमहाकालेन सुरतं क्रीडितां पुनः किंभूतां सुखीभूतां निश्चेष्टितां॥२१॥ प्रसूतं ते
सारं जननि जगतीं पालयति च समस्तं क्षित्यादि प्रलयसमये संहरति च॥ अतस्त्वं धाता पि त्रिभु
वनपतिः श्रीपतिरपि महेशोऽपि प्रायः सकलमपि किं स्तोमि भवती॥२२॥ त्रिगुणपुरुषरूपत्वं स्तु स्त
तिमाह॥ प्रसूतइति। हे जननि संसारं प्रपंचं प्रसूते प्रसवं करोति॥ जगतीं पालयति प्रलयसम
ये प्रलयकाले समस्तं प्रपंचं क्षित्यादि संहरति च॥ अतः कारणात्त्वं धाता पितामहो ब्रह्मा रजोगुणः
त्रिभुवनपतिः श्रीपतिर्लक्ष्मीपतिः हरिरपि सत्वगुणः॥ प्रायः कलया अंशरूपया सहवर्तमा
ने सकलं ब्रह्मादि हरं सर्वं देवत्वमपि। भवती जगन्मयी किं स्तोमि किं स्तवनं करोमिति॥२२॥
अनेके त्वोवंते भवदधिकगीर्वाणनिवहान् विमूढास्ते मातः किमपि न हि जानंति परमं॥ स
मारा ध्याम त्वां हरिहरविरिंच्यादिविबुधैः प्रपन्नोऽस्मि स्वैरं रतिरसमहानंदनिरतां॥२३॥
हे मातः अनेके स्तुतिविदो जना भवदधिकगीर्वाणनिवहान् त्वदधिकदेवसमूहान् हरिहररू
पादीन् सेवंते जना विगतिमूढा अतिमूढाः॥ ते तव परमं महिमानं किमपि न हि जानंति॥ स्वैरं
स्वैरं स्वछंदं न यरूपया अहं त्वां प्रपन्नोऽस्मि प्रपन्नो भजामि त्वां किंभूतां आघोररतिरसेन निरय

क्रीडारसेन महानंदनिरतां हरिहरविरंच्यादिविबुधैर्देवैः समाराध्यां पूजनीयामुपास्यां ॥ १३ ॥ धरि
॥ध॥ त्री कीलालं शुचिरपि समीरोपि गगनं त्वमेका कल्याणी गिरिशरमणी कालि सकलं ॥ स्तुतिः का ते
मातः करुणया मामगतिकं प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥ सकलमपि प्रपंचयन्न
स्तौति धरित्रीति ॥ हे कालि त्वमेकाद्वितेरूपा कल्याणी सर्वमंगला आनंदरूपा गिरिशरमणी
धरित्री पृथिवी त्वं ॥ कीलालममृतं जलं त्वं शुचिरपि अग्निः सूर्यस्तेजोरूपोसि वा समीरः पवनो
पि गगनमाकाशः सकलमपि पंचविंशतितत्वस्वरूपं त्वमसि ॥ तेन पंचविंशतितत्वैः स्त[illegible] पंच
भूतात्ममयी विश्वरूपिणी त्वं ॥ हे मातः तव का स्तुतिः त्वं निजकरुणया स्वकीयजनकरुणा[illegible] व
लोकनतया मां अगतिकं गतिहीनं भजनहीनं प्रसन्ना भूयाः प्रसन्ना भव त्वं प्रसन्नासती अनु भव
भवं संसारमनु लक्षीकृत्य संसारे मम जनुर्जन्म न भूयात् ॥ पुनर्जन्माभाव इत्यर्थः ॥१४॥ स्मशानस्थः
सुस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमं ॥ जपंस्त्वत्प्रत्येकं मनु
मपि तव ध्याननिरतो महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५॥ एतासाधनमुक्त्वा अधु ॥ध॥
ना द्वाभ्यां चितासाधनविधिं स्तवमाह ॥ स्मशानस्थ इति हे महाकालि स्मशाने तिष्ठतीति स्म
शानस्थः सुस्थः स्थिरचित्तः ॥ गलितचिकुरो मुक्तकेशो दिक्पटधरो दिगंबरः ॥ ध्याननिरतो

ध्यानपरः प्रस्तव मनुं जपन्स्तन्‌ गनिजगलितवीर्येण सह ॥ अर्काणां नवानां कुसुमं सहस्रं तत्प्रत्येकं चिता
यां वितरन्निस्वे सेऽध्ययथास्यात्तथा वसिमापरिवृतोन्नृपो भवतीत्यर्थः स्मशाने प्रसुतजपानंतरं स
हस्रसंख्या होमः कर्तव्यः प्रयोग तयुतं जपेदिति ॥१५॥ गृहे संमार्जन्याः परिगलितवीर्यं च चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने ॥ समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं गजारू
ढो याति क्षितिपरिवृत सत्कविवरः ॥१६॥ हे कालि यः साधकः प्रेम्णा दिव्यभावेन कुजदिने मंगल
वारे मध्याह्ने निजशोणितमूलं मनुं समुच्चार्य गृहे संमार्जयतीति ॥ श्रोषावृद्धादिति ऐवं गृहे संमार्जनी
स्त्री तस्याः परिगलितवीर्यं चिकुरं केशं समूलं दपि एकवारं चितायां वितरति वितरणं करोति सः
सततमङ्गसंगजारूढो याति क्षितिपरिवृतः सत्कविवरः स्यात् स्मशाने साधनानंतरं सवा
रूढः कर्तव्यः तावक्षिपित्स्तंप्रेनुसंचेयः इदं तु वीरसाधनमिति ॥१६॥ सपुष्पैः संकीर्णं कुसुमधनुषो
मंदिरमहो पुरो ध्यायं ध्यायं जपति परमं या तव मनुं स गंधर्वश्रेणीपतिरिव कवित्वामृतनदीनदी
नः पर्यंते परमपदलीनः प्रभवती ॥१७॥ काम्यकस्यापि स्विस्तव माह सपुष्पैरिति ॥ ओंदसत्वाव ॥
हे अंबा हे मातः अहो आश्चर्यं यो भक्तः कुसुमधनुषः कामस्य मंदिरं जगं स्व सपुष्पैः संकीर्णं रङ्गो
पुतं पुरोपि ध्यायन् ध्यायन् जपपरं मनुं मंत्रं जपति स गंधर्वश्रेणीपतिः सगंधर्वराजः कवित्वा

मतनदीनदीनः॥कश्चित्वमेवामतंतस्यनदीकश्चित्वामतनदीनयाइनः नदीनः समुद्रकश्चित्वाम
तनदीनां नदीनः कश्चित्वामतनदीनदीनसमुद्रइवपरिस्रवंतो भावेन अंते अंतकाले परमप

देयकालिकाचरणालीनाः प्रभवंति॥१७॥त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां महाका
लेन...श्रेमदनरससलावण्यनिरतां॥समासक्तो नक्तं स्वयमपि तथानंदनिरतो जनो यो ध्या
येत्वांजननिरलसस्यास्मरहरः॥१८॥ यंत्रमपिवित्स्तवमाह॥त्रिपंचारइति॥हे कालिके योमे
क्तोजनस्त्वामानंदनिरतो॥नक्तंरात्रौ शवहृदि त्रिपंचारे साष्टदलपंचत्रिकोणेचतुरस्रात्म
के॥चतरस्रे पंचत्रेपीठे लास्मेरवदनां महा हास्यवदनां ध्यायेत्॥किंलक्षितिर्भवेसस्मरहरः
शिवस्यात्॥यांकिंभूतां ऽदृश्ये रतिनायेनमहाकालेनमदनरसेन कामरसलावण्येन॥ना
नाश्रृंगाररतिवेदेननिरतां॥जेनः किंभूतः स्वयमपि समासक्तः तेनस्वाचकोरसासक्त हृदय
र्यः॥इतियंत्रपूजापाः प्रधान्यं सूचितमिति भावः॥सितलोमास्थिस्वैरं पललमपि मार्जारमसुरं विते
परंचौष्ट्रं मेषं नरमहिषयोश्छागमपिवा॥बलिंतेपूजायामयिवितरतांमर्त्यवसतांसतांसिद्धिः

सर्वाप्रतिपदमपूर्वाप्राप्तिर्भवति॥१९॥ पूजायांबलिदानंदर्शयन्स्तौति॥लोमास्थीति॥
अयिहेअसितेकालिके योभक्तः तेतवपूजायां स्वैरंस्वच्छंदं सलोमास्थिपललं लोमसहितं

अत्र वाच्यं कालदयस्य प्राधान्यसूचनार्थं ॥ किंभूतं स्तोत्रं स्तवपादांबुजयुगलस्य पूजा पापविपिस्तेन
॥१८॥ युतं गतवमत्नं नामं त्राणां समुद्धारणेन जनतुर्जनाप्रकाशकमिसर्थः ॥२१॥ कुरंगाक्षीवृंदं तमनु
सरति प्रेमतरलं यशास्तस्य क्षोणीपतिरपकुबेरप्रतिनिधिः ॥ रिपुः कालागारं कलयति
च तत्केलितल्पास्वपंजीवन्मुक्तः सभवति भवस्य प्रतिनिधिः ॥२२॥ कुरंगाक्षीवृंदं मृगाक्षी
वृंदं स्त्रीवृंदं तत्कर्तृ तं भक्तं चानुसरति अनुगच्छति ॥ तस्य भक्तस्य कुबेरप्रतिनिधिः कुबेर
सदृशः क्षोणीपतिर्राजावश्यो भवति ॥ तस्य भक्तस्य रिपुः शत्रुः कारागारं यमालयं कलय
ति गच्छति ॥ तत्केलिकलया कृतकौतुकं कलयास्वपंजीवन्मुक्तः ॥ भवस्य शिवस्य प्रतिनि
धिः सदृशो भवति ॥ तत्कौतुकप्रेमणा रसेन तरलमिसर्थः ॥२२॥ ॥इति श्रीकालिकाकुल
सर्वस्वे महाकालस्तुतकर्पूरस्तवः संपूर्णः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥१८॥
भवेयं मातस्त्वच्चरणदासानुदासः कुकर्मी कः समुचितकुलाचारविपुता ॥ तथापि तत्
भवजलधिमाह्निकरं समानिच्छेन्मोक्षं तव चरणध्यानकरणात् ॥छ॥ इति श्रीब्रह्मानंदस
रस्वती कृता स्वरूपाख्यस्तोत्रस्य आनंददीपिनी टीका समाप्ता ॥ ॥छ॥ श्रीकालिकार्पणमस्तु ॥